©cc-by-nc-sa 2004-2025 Н.П.Лихушина
http://galenel.info/sanskrit/13-upanishad/mandukya-unit.pdf

# माण्डूक्योपनिषत्

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेम देवहितं यदायुः ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

yajatra - достойный поклонения, заслуживающий благоговения;
tanū *f* - тело;
vyaś (vi√aś V U.) - получать, проникать;
svāsti *f, n* - благо; счастье; svāsti (+D.) да здравствует кто-либо;
tārkṣya *m* - мифическое существо, в Ригведе конь-солнце; позже эпитет Гаруды;
ariṣṭanemi - с неповрежденным ободом, (от ariṣṭa - целый, неповрежденный, nemi - обод колеса)
*мангала Черной Яджурведы*

ओमित्येतदक्षरमिदँ सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव ॥ १ ॥

upavyākhyāna *n* – объяснение;

सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥ २ ॥

जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ॥ ३ ॥

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः ॥ ४ ॥

pravivikta (p.p. от pravi√vic) – раздельный, одинокий; тонкий, изысканный;

यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत् सुषुप्तम् ।

सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥ ५ ॥

ghana *m* – облако, груда, масса;

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ ६ ॥

antaryāmin *m* – душа (обуздывающая чувства внутри);
apyaya *m* - исчезновение, конец;

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् ।

अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा

स विज्ञेयः ॥ ७ ॥

vyavahārya – тот, с которым можно общаться;
vy-apa√diś VI P. - называть, обозначать;
pratyaya *m* – вера, убеждение, мысль, идея, довод;
sāra *m* - сила, мощь; ценность, суть, сущность;
prapañca *m* – проявление, многообразие, иллюзия; видимый мир;

सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ॥ ८ ॥

mātra *n* – матра, метрическая единица: время, которое требуется для произнесения краткого гласного;

जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादिमत्त्वाद्वाऽऽप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद ॥ ९ ॥

āpti *f* – достижение, получение;
ādimattva *n* – изначальность;

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसंततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद ॥ १० ॥

utakrṣa *m* - преимущество, превосходство; возвышение, подъем; избыток;
ut√karṣ I P. - поднимать, вынимать, превозносить;
saṃtati *f* – потомство; развитие, расширение; продолжение, длительность;

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद ॥ ११ ॥

miti *f* – мера, измерение; количество, цена;
apīti *f* – вхождение внутрь, растворение;

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद ॥ १२ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

॥ इति माण्डूक्योपनिषत् समाप्ता ॥

iti māṇḍukya-upaniṣat samāptā
Мандукья-упанишада закончена